रूप्यञ्च मिलितं प्रत्येकञ्च कोशादिद्वयवाच्यम्। क्षतमावर्त्तितं अक्षतमाकरोत्यं चूर्णं घटिताघटितमिति स्वामी। क्षतमाभरणीकृतं अक्षतं चूर्णादिरूपमाकरोत्यमिति केचित्। (आवरणविशेषः। यथा, भागवते। २। १। ३४।

"अव्यक्तमाहुर्हृदयं मनश्च
स चन्द्रमाः सर्व्वविकारकोशः"॥

मुकुलम्। यथा, रघौ। ३। ८।

"तिरश्चकार भ्रमराभिलीनयोः
सुजातयोः पङ्कजकोशयोः श्रियम्"॥)

कोशकारः, पुं, (कोशं करोति त्वक्पत्रादिभिरात्मानमाच्छादयति। कोश + कृ + अण्।) इक्षुः। इति शब्दरत्नावली॥ मूर्द्धन्यमध्योऽप्ययम्॥ (कोशं करोति स्वमुखलालारूपतन्तुभिरात्मानमाच्छादयतीति। कीटविशेषः। गुटिपोका इति भाषा। यथा, भागवते। ६। १। ५२।

"कोशकार इवात्मानं कर्म्मणाच्छाद्य मुह्यति"॥)

कोशफलं, क्ली, (कोशे फलं वीजं अस्य।) कक्कोलकम्। इत्यमरः। २। ६। १३०। (कक्कोलकशब्देऽस्य विवरणं ज्ञेयम्॥)

कोशफला, स्त्री, (कोशे फलं यस्याः।) महाकोशातकी। त्रपुषी। इति राजनिर्घण्टः॥

कोशलः, पुं स्त्री, (कुश् + "वृषादित्वात्" उणां। १। १०८। कलः वाङ्लकात् गुणः।) अयोध्यानगरी। इति शब्दमाला उणादिकोषश्च। मूर्द्धन्यमध्योऽप्ययम्। (यथा, रामायणे। १। ५। ५।

"कोशलो नाम मुदितः स्फीतो जनपदो महान्।
निविष्टः सरयूतीरे प्रभूतधनधान्यवान्"॥)

कोशलात्मजा, स्त्री, (कोशलस्य कोशलन्टपतेरात्मजा दुहिता।) कौशल्या। सा तु श्रीराममाता दशरथराजपत्नी च। इति शब्दरत्नावली॥

कोशलिकं, क्ली, (कुशलाय कर्म्मणे हितजनककार्य्यसिद्धार्थमिति भावः दीयते यत्। कुशल + ठक् निपातनात् पूर्व्वस्य ओकारत्वम्।) उत्कोचः। इति हेमचन्द्रः। घुष इति भाषा। मूर्द्धन्यमध्योऽप्ययम्॥

कोशाङ्गं, क्ली, (कोश इव अङ्गमस्य।) शरकटः। इति हारावली॥ ओकड़ा इति भाषा॥ मूर्द्धन्यमध्योऽप्ययम्॥

कोशातकः, पुं, (कोशं शिरःकोशं अतति गच्छति सातत्येन प्राप्नोतीति। अत + वुन्।) कचः। इति विश्वमेदिन्यौ॥ (कोशं वेदात्मकमाकरमतति प्राप्नोतीति वाक्ये। यजुर्वेदीयशाखाविशेषः। कठवल्ली उपनिषद्॥)

कोशातकी, स्त्री, (कोशं अततीति। अत + वुन्। ततः कोशातक + गौरादित्वात् ङीष्।) पटोली। घोषकः। इति मेदिनी॥ फलशाकविशेषः। झिङ्गा इति भाषा। तत्पर्य्यायः। क्षतच्छिद्रा २ जालिनी ३ क्षतवेधना ४ क्ष्वेड़ा ५ सुतिक्ता ६ घण्टाली ७ मृदङ्गफलिनी ८ कर्कशच्छदा ९। अस्या गुणाः। शिशिरत्वम्। कटुत्वम्॥ कषायत्वम्। पित्तवातकफनाशित्वम्। मलाध्मानविशोधनत्वञ्च। इति राजनिर्घण्टः॥ मूर्द्धन्यमध्योऽप्ययम्। महाकोशातकी। राजकोशातकी। यथा।

अथ नेनुआ।

"महाकोशातकी प्रोक्ता हस्तिघोषा महाफला।
धामार्गवो घोषकश्च हस्तिपर्णश्च स स्मृतः॥
महाकोशातकी स्निग्धा सरा पित्तानिलापहा"॥

अथ तोरइ।

"धामार्गवो पीतपुष्पो जालिनी क्षतवेधना।
राजकोशातकी चेति तथोक्ता राजिमत्फला॥
राजकोशातकी शीता मधुरा कफवातला।
पित्तघ्नी दीपनी श्वासज्वरकासक्रिमिप्रणुत्"॥

इति भावप्रकाशः॥ (अस्या गुणा यथा,—

"कोशातकी फलं स्वादु मधुरं वातपित्तनुत्।
विपाके च कफं हन्ति ज्वरे शस्तं प्रदिश्यते"॥

इति हारीते प्रथमस्थाने १० अध्याये॥)

कोशातकी, [न्] पुं, (कोशातकोऽस्यास्तीति। इनिः।) वाणिज्यम्। वणिक्। वाड़वाग्निः। इति विश्वः॥

कोशाम्रः, पुं, (कोशे + आम्र इव फलमस्य।) फलवृक्षविशेषः। कोशाम इति भाषा। तत्पर्य्यायः। क्षुमिवृक्षः २ सुकोशकः ३। इति भावप्रकाशः॥ घनस्कन्धः ४ वनाम्रः ५ जन्तुपादपः ६ क्षुद्राम्रः ७ रक्ताम्रः ८ लाक्षावृक्षः ९ सुरक्तकः १०। अस्य गुणाः। कुष्ठशोथास्रपित्तव्रणकफापहत्वम्। तत्फलगुणाः। ग्राहित्वम्। वातघ्नत्वम्। अम्लत्वम्। उष्णत्वम्। गुरुत्वम्। पित्तदत्वञ्च। इति भावप्रकाशः॥ कफार्त्तिप्रदत्वम्। विदाहित्वम् विशोषकारित्वञ्च॥ पक्वस्य तस्य गुणाः। मधुरत्वम्। अम्लत्वञ्च॥ पक्वादियुक्तस्य तस्य गुणाः। दीपनत्वम्। रुचिपुष्टिबलकारित्वञ्च। तत्तैलस्य गुणाः। सारकत्वम्। क्रिमिकुष्ठव्रणापहत्वम्। अम्लमधुरत्वम्। बल्यत्वम्। पथ्यत्वम्। रोचनत्वम्। पाचनत्वञ्च। इति राजनिर्घण्टः॥ (रोगविशेषेऽस्य व्यवहारो यथा, सुश्रुते चिकित्सितस्थाने ९ अध्याये॥

"आरग्वधं वा सार्षपं वा क्षतेषु
योज्यं तैलं शिग्रुकोशाम्रयोर्वा"॥)

कोशिला, स्त्री, (कोशः कोश इव पदार्थो वा अस्याः अस्तीति। कोश + पिच्छादित्वात् इलच्।) मुद्गपर्णी। इति राजनिर्घण्टः॥

कोशी, स्त्री, (कुश् संश्लेषे + अच् गौरादित्वात् ङीष्।) उपानत्। जुता मोजा इति च भाषा। तत्पर्य्यायः। पन्नद्धी २ पादविरजाः ३ पादरथी ४। इति हारावली॥ शुङ्गा। इति हेमचन्द्रः। धान्यादिर शुँया इति भाषा॥

कोषः, पुं क्ली, (कुष्यन्ते आकृष्यन्ते फलपुष्पोत्पादकमधुमयपरागादयो यस्मिन्। कुष् न निष्कर्षे + घञ्कर्त्तरि चेति अधिकरणे घञ्।) कुड्मलः। कुँड़ि इति भाषा। खड्गपिधानम्। खाप इति भाषा। (यथा, महाभारते। ४। ४०। १३-१५।

"कस्यायं विपुलः खड्गो गव्ये कोषे समर्पितः।
हेमत्सरुरनाधृष्यो नैषध्यो भारसाधनः॥
कस्य पाञ्चनखे कोषे शायको हेमविग्रहः।
प्रमाणरूपसम्पन्नः पीत आकाशसन्निभः॥
कस्य हेममये कोषे सुतप्ते पावकप्रभे।
निस्त्रिंशोऽयं गुरुः पीतः शैक्यः परमनिर्व्रणः"॥)

अर्थसमूहः। (यथा, रघौ। ५। १।

"तमध्वरे विश्वजिति क्षितीशं
निःशेषविश्राणितकोषजातम्"॥)

दिव्यम्। (यथा, राजतरङ्गिण्यां। ५। ३२५।

"ततो निक्षिप्य चरणं रक्ताक्ते मेषचर्म्मणि।
कोषं चक्रतुरन्योऽन्यं सखड्गौ न्टपडामरौ"॥)

अण्डम्। शताङ्कतं हेमरूप्यम्। इत्यमरः। २। ९। ९१। अस्य विवरणं तालव्यान्ते द्रष्टव्यम्। पात्रम्। जातीकोषः। जायफल इति भाषा। (जातीपत्री। जयित्री-अर्थे व्यवहारो। यथा, गर्भचिन्तामणिरसे।

"रसं तालं तथा लौहं प्रत्येकं कर्षमात्रकम्।
कर्षद्वयन्तथाभ्रं कर्पूरं वङ्गताम्रकम्॥
जातीफलं तथा कोषं गोक्षुरञ्च शतावरीम्।
बलातिबलयोर्मूलं प्रत्येकं तोलकं शुभम्॥
वारिणा वटिका कार्य्या द्विगुञ्जा फलमानतः।
सन्निपातं निहन्त्याशु स्त्रीणाञ्चैव विशेषतः॥
गर्भिण्या ज्वरदाहञ्च प्रदरं सूतिकामयम्"॥

इति वैद्यकभैषज्यधन्वन्तरिग्रन्थे स्त्रीरोगाधिकारे॥) शब्दादिसंग्रहः। इति मेदिनी। (यथा, अमरकोषः॥) भाण्डागारम्। पानपात्रचषकः। योनिः। शिम्बा। इति हेमचन्द्रः॥ पनसादिफलस्यान्तः। इति धरणी॥ शब्दान्तरसंयोगे गोलकवाचकः। यथा सूत्रकोषः नेत्रकोष इत्यादि। इत्यमरटीकायां स्वामी॥ धनसंहतिः। इति जटाधरः॥ (यथा, मार्कण्डेयपुराणे देवीमाहात्म्ये।

"कोषो बलञ्चापहृतं तत्रापि स्वपुरे ततः"॥)

तत्सञ्चयगुणाः।

"कोषो महीपतेर्जीवो न तु प्राणाः कथञ्चन।
द्रव्यं हि राजा भूपस्य न शरीरमिति स्थितिः॥
धर्म्महेतोः सुखार्थाय भृत्यानां भरणाय च।
आपदर्थञ्च संरक्ष्यः कोषः कोषवता सदा॥
धनात् कुलं प्रभवति धनाद्धर्म्मः प्रवर्त्तते।
नाधनस्य भवेद्धर्म्मः कामश्चैव कथञ्चन॥
अधर्म्मेण धनं कुर्य्यात्तद्धनं गृह्यते परैः।
स्वयं पापस्य पात्रं स्यात् सिंहो हस्तिवधादिव॥
तादात्विको मूलहरः कदर्य्यस्त्रिविधोऽर्थकः।
उत्पन्नार्थव्ययकरो यो भविष्यद्धनाशया॥
स तादात्विक आख्यातः कल्याणी तस्य नायतिः।
यः पित्राद्यर्ज्जितं वित्तमन्यायेन तु भक्षयेत्॥
स मूलहर आख्यातस्तदुदर्कोऽपि चाशुभः।
स कदर्य्यस्तु भृत्यात्मपीड़नैरर्थसञ्चयी॥
तद्धनं राजदायादतस्कराणां निधिर्भवेत्।
भिक्षा च राजकोषश्च स्तोकस्तोकेन वर्द्धते॥
अञ्जनञ्च धनञ्चैव स्तोकस्तोकेन हीयते।
कोषस्य साधनोपायो मुख्यं राष्ट्रमिति स्मृतम्।
भूगुणैर्वर्द्धते राष्ट्रं तद्वृद्धिर्न्टपवृत्तता।
राज्ञोपायेन संरक्ष्या ग्रामे ग्रामे कृषीवलाः॥
तेभ्यः कृषिस्ततस्तार्थां अर्थेभ्यः सर्व्वसम्पदः।
शरीरकर्षणात् प्राणाः क्षीयन्ते प्राणिनां यथा
तथा वर्षेषु वर्षेषु कर्षणात् भूगुणक्षयः।